श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधि स्वामिना विरचितम्

# ॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि सुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि सुप्रभातम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

देवकीपुण्यसञ्जात! वासुदेव! जगत्पते।
उत्तिष्ठ राजगोपाल! यशोदानन्दवत्सल॥ १ ॥

श्रीचापमासभवभक्तपदाब्जरेणु-
प्राबोधकीप्रभृतिसूक्तिलसन्निजास्याः।
अध्यापकाः विरचिताञ्जलयस्समेताः
श्रीचापपत्तनपते! तव सुप्रभातम्॥ २ ॥

प्रातः प्रसूनकुलतः किल सौरभाणि
वातः प्रकीर्य हरितां पुनरान्तरेषु।
शीतः प्रवाति मधुरो मृदुलस्त्वदर्थं
भ्रातः! प्रलम्बमथितुः तव सुप्रभातम्॥ ३ ॥

नानाविधाभरणजालविभूषिताङ्ग्यः
मानातिलङ्घिविनयावनताः नताङ्ग्यः।
गानाभिभूतकलकण्ठगणाः उपेताः
हे नाथ! कार्मुकपुरस्तव सुप्रभातम्॥ ४ ॥

क्षीराब्धिनाथ! भगवन्! मधुरावतार!
सूरात्मजातरण! गोकुलक्लृप्तलील!।
धाराधराभ! धरणीधरधारिपाणे!
श्रीराजगोप! यदुनायक! सुप्रभातम्॥ ५ ॥

www.prapatti.com

अम्भोजपत्रविपुलामलदीर्घनेत्र !
सम्भोगतुष्ट ! रमणीयविदर्भजायाः।
अम्भोजसम्भवमुखैरभिवन्दिताङ्घ्रे !
अम्भोदकृष्ण ! यदुनायक ! सुप्रभातम्॥ ६ ॥

भानूदितातटलतासदनेऽतिपुण्ये
भानूदयावधि विधाय रसैर्विलासम्।
भाऽनूनरूपगुणवृत्तसुराधिकायाः
श्रीनूतनाद्यपशुपालक ! सुप्रभातम्॥ ७ ॥

भीमानुजाय कथितामृतगीत ! नाथ !
धीमान्ममान्तर इति प्रथयन्प्रभावम्।
सीमातिलङ्घिकरुणामयदिव्यमूर्ते !
सोमास्य ! कृष्ण ! भगवन् ! तव सुप्रभातम्॥ ८ ॥

श्रीपारिजातचरितं व समुद्वमन्त्या
श्रीपाकशासनदृशा समुदीक्षितस्य।
श्रीपाकरम्यगुणसत्यमहानुभाव !
श्रीपाद्यकृष्ण ! यदुनायक ! सुप्रभातम्॥ ९ ॥

कामाभितप्तपशुपालविलासिनीनां
कामाभिपूरणकृतार्थकृपाविलास !।
कामादिपालसहजात ! शिवाभितप्त-
कामावतार ! यदुनायक सुप्रभातम्॥ १० ॥

नीलाम्बुदाभ ! निखिलागममौलिलोल !
नीलाम्बरावरज ! निस्तुल ! नीलजाक्ष !।
नीलाम्बराभरणसूरसुतामनोज्ञ-
नीलाम्बुनील ! यदुनायक ! सुप्रभातम्॥ ११ ॥

कालाम्बुदाभकमनीय ! गुणाम्बुराशे !
तालाङ्कसोदर ! तमःकुलचित्रभानो !।

www.prapatti.com

बालाङ्ककेतुरथसूत ! सुनन्दपत्न्याः
    बालाङ्कभूषण ! यदूत्तम ! सुप्रभातम्॥ १२ ॥

मालाकृते करुणया रचितप्रसाद !
    कालाधिभीम ! निजमातुलदैत्यनेतुः।
सालाभिरामभुजपातितवारणेन्द्र !
    मालाल्यपाद ! यदुनायक ! सुप्रभातम्॥ १३ ॥

शूलायुधस्तववितीर्णतदीयजीव !
    मूलास्यसर्वजगतः मुनिबृन्दवन्द्य !।
तूलायिताखिलरिपो ! तपनोदितायाः
    कूलावनीरत ! यदूत्तम ! सुप्रभातम्॥ १४ ॥

वेलातिलङ्घिकरुणारसपूर्णचित्त !
    मेलालितोऽसि शिरसेति नुतार्जुनेन।
चेलापहार ! पशुपालककन्यकानां
    वेला दिनोदयवती ! तव सुप्रभातम्॥ १५ ॥

बालासु तासु पशुपालकुलोदितासु
    मालासु भृङ्गसमभासुरसौरभासु।
लीलायुतासु ललिताङ्गमनोहरासु
    लोलान्तरङ्ग ! यदुनन्दन ! सुप्रभातम्॥ १६ ॥

मीनावतार ! महनीयगुणोपपन्न !
    दीनावनैकरत ! पालितवेदवृन्द !।
एणाङ्कनन्दनविलोचन ! क्लृप्तसाम्य !
    लीलासुरेन्द्र ! तव यादव ! सुप्रभातम्॥ १७ ॥

बाणाहवे महति बाहुसहस्रभीतौ
    एणाङ्कमौलिरचितार्थनया दयार्द्रः।
वीणाप्रवादनकृते त्वमदा हि बाहू
    शोणाम्बुदाक्ष ! यदुनन्दन ! सुप्रभातम्॥ १८ ॥

दुग्धाब्धिजास्विव परासु सदङ्गनासु
मुग्धासु तासु पशुपालककन्यकासु।
दुग्धाब्धितल्प ! मधुरासु रसोल्बणासु
मुग्धाऽयि ! कृष्ण ! यदुनन्दन ! सुप्रभातम्॥ १९ ॥

भिक्षाधिपाय सुहृदे हि सुदामनाम्ने
कक्षान्तक्लृप्तपृथुकाय सदुत्तमाय।
यक्षाधिपत्वमददाः क्षणवीक्षणेन
अक्षाममान्यदय ! यादव ! सुप्रभातम्॥ २० ॥

ऋक्षादिनाथतनयां विनयोपपन्नाम्
ऋक्षादिनाथवदनामवलोक्य हृष्ट !।
यक्षादिनाथनुत ! हे वसुदेवपत्न्याः
कुक्षावुदीत ! भगवन् ! तव सुप्रभातम्॥ २१ ॥

दोषा रतैरतिरसै रचिता गुणाढ्या
योषागणैरनुपमैरमितैरुदारैः।
दोषाकराननन ! गुणाकर ! मामकीनान्
दोषानपाकुरु यदूत्तम ! सुप्रभातम्॥ २२ ॥

भाषापतिर्विहितवत्सकुलापहारः
घोषावनौ विहितवत्सकुलस्वरूपात्।
पूषायितात्स भवतः किल लज्जितोऽस्तौत्
तोषाय नन्दकुलनन्दन ! सुप्रभातम्॥ २३ ॥

वीरार्जुनः परशुरामतया हतोऽभूद्
वृक्षार्जुनौ च भवता भवतोऽवितौ च।
धीरार्जुनस्तु समरे परिपालितात्मा
कृष्णार्जुनातियशसा तव सुप्रभातम्॥ २४ ॥

रामानुजात ! रमणीयगुणाम्बुराशे !
रामावताररणरञ्जितराक्षसेन्द्र !।

रामानुजातविशदीकृतगीत ! गोप !
रामानुषङ्ग ! यदुपुङ्गव ! सुप्रभातम्॥ २५ ॥

सामादिरूप ! सनकादिभिरर्चिताङ्घ्रे !
सामाद्युपायचतुरानन ! सर्वलोक !।
सा मा ममेति ममतावति चैद्यराजे
सामानताप्रद ! यदूत्तम ! सुप्रभातम्॥ २६ ॥

कामान्विहाय चलतां सुलभस्वरूप !
कामान्विधातुमपि सज्ज निजानतानाम्।
कामात्मजातनुजातकृते निरुद्ध-
कामारिभक्तपुर ! यादव ! सुप्रभातम्॥ २७ ॥

आजानुलम्बिभुजमध्यनिवासतुष्ट-
माजातमङ्गलनिधे ! मधुरस्वभाव !।
वाजातिदानपरिपालितभक्तबृन्द !
साजामरेडित ! यदूत्तम ! सुप्रभातम्॥ २८ ॥

आशासु विश्रुतमनोहरभव्यमूर्ते
नाशाय जात धरणीतलभारभूम्नः।
ईशायि ! सर्वजगतां रमणीमणिश्री-
योषानिवास ! यदुनन्दन ! सुप्रभातम्॥ २९ ॥

भागीरथीजननपावनपादपद्म !
योगीन्द्रमानसनिवास ! धनुष्पुरीश !।
वागीश्वरादिनुत ! गोकुललोलचित्त !
भोगीन्द्रतल्प ! यदुनन्दन ! सुप्रभातम्॥ ३० ॥

इत्थं धनुष्पुरपतेरिह सुप्रभातं
तेनैव मानिधिमुखेन कृतं मनोज्ञम्।
यो मानवः प्रतिदिनं पठति प्रभाते
तं श्रीश्च गीश्च सुखमायुरुपैति कीर्तिः॥ ३१ ॥

॥ इति श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि सुप्रभातं समाप्तम् ॥

www.prapatti.com